This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

430

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2430 विषय वेदांग

नाव वेदांतसार

लेखक/लिपीकार श्रीहरी

पृठ 32 काळ ...... पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१

M-2430

२३

वेदांतसार पुस्तकारंभपत्र मिदम् ॥ श्री शिवोजयति

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ ॥श्री गणपतयेनमः॥ श्रीगुरुचरणसरोजेभ्यो नमः॥ अखंडं सच्चिदानंदमवाङ्मन
सगोचरम्। आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये। १। अर्थतोप्यद्वयानंदानतीतद्वैतभानतः।
गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति। २। वेदांतो नामोपनिषत्प्रमाणं। तदुपकारीणि शारीरकसूत्रा
दीनि च। अस्य वेदांतप्रकरणत्वात् तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः। तत्रानुबं
धो नामाधिकारिविषयसंबंधप्रयोजनानि। अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोधिग
ताखिलवेदार्थोस्मिन् जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तकप्रायश्चित्तो
पासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमा
ता। काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि। निषिद्धानि नरकाद्यनिष्टसाधनानि हिंसा
दीनि। नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि। नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातेष्ट्यादीनि। प्रायश्चित्तानि पापक्षयसाधनानि-चांद्रायणादीनि। उपासनानि सगुणब्रह्मविषयमान
सव्यापाररूपाणि शांडिल्यविद्यादीनि। एतेषां नित्यनैमित्तिकादीनां बुद्धिशुद्धिः प्रयोजनं। उपासनानां तु
चित्तैकाग्र्यं। विविदिषंति यज्ञेन दानेनेत्यादिश्रुतेः। तपसा कल्मषं हंतीत्यादिस्मृतेश्च। नित्यनैमित्तिकयो
रुपासनानां चावांतरफलं पितृलोकसत्यलोकावाप्तिः। कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेः।
साधनानि नित्यानित्यवस्तुविवेकः। इहामुत्रफलभोगविरागः। शमदमादिसंपत्। मुमुक्षा च। नित्यानि
त्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति विवेचनं। ऐहिकानां स्रक्चंदनवि
षयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो
नितरां विरतिरिहामुत्रफलभोगविरागः। शमादयः शमो दम उपरतिस्तितिक्षा समाधानं श्रद्धा।
शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो म
नसो निवर्त्तनं। निवर्त्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः। अथवा विहितानां कर्मणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिनापरित्यागः। तितिक्षाशीतोष्णादिद्वंद्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च
२ समाधिः समाधानं। गुरुवेदांतवाक्येषु विश्वासः श्रद्धा। मुमुक्षा मोक्षेच्छा। एवंभूतः प्रमाताधिकारी शांतो
दांतस्तितिक्षुरुपरतः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतेः। उक्तं च। प्रशांतचित्ताय जितेंद्रिया
य प्रहीणदोषाय यथोक्तकारिणे। गुणान्विताया नुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षुभिरिति। विषयो
जीवब्रह्मैक्यं। शुद्धचैतन्यं प्रमेयं। तत्रैव वेदांतानां तात्पर्यात्। संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिष
त्प्रमाणस्य च बोध्यबोधकभावलक्षणः। प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः। स्वस्वरूपानंदावाप्ति
श्च। तरति शोकमात्मवित्। ब्रह्मवेद ब्रह्मैव भवतीत्यादिश्रुतेः। अयमधिकारी जननमरणसंसारान
लसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसर
ति। स मित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतेः। स परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति। तस्मै स विद्वा २
नुपसन्नाय प्राहेत्यादिश्रुतेः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असर्पभूतेरज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोध्यारोपः। वस्तु सच्चिदानंदाद्वयंब्रह्म। अज्ञानंतु सदसद्भ्या
मनिर्वचनीयंत्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किंचिदिति वदंति। अहमज्ञइत्यनुभवादेव। देवात्मश
क्तिंस्वगुणैर्निगूढामित्यादिश्रुतेश्च। इदमज्ञानंव्यष्टिसमष्ट्यभिप्रायेणैकमनेकमितिच व्यवह्रियते। त
थाहि। यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः। यथा वा जलानां समष्ट्यभिप्रायेण जला
शय इति। तथा नानात्वेन प्रतिभासमानजीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः। अजा
मेकामित्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधाना॥ एतदुपहितं चैतन्यं सर्वज्ञत्व
सर्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामिजगत्कारणमीश्वर इति व्यपदिश्यते। सकलाज्ञा
नावभासकत्वात्। यः सर्वज्ञः सर्वविदित्यादिश्रुतेः। अस्येयं समष्टिरखिलकारणत्वात्कारणशरी
रं। आनंदप्रचुरत्वात्कोशवदाछादकत्वाच्चानंदमयः कोशः। सर्वोपरमत्वात्सुषुप्तिः। अत एव स्थूलसूक्ष्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रपंचलयस्थानमिति चोच्यते। यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः। यथा जला
शयस्य व्यष्ट्यभिप्रायेण जलानीति। तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः। इंद्रो मा ६२
याभिः पुरुरूप ईयत इति श्रुतेः। अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः। इयं व्य
ष्टिर्निकृष्टोपाधितया मलिनसत्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इ
त्युच्यते। एकाज्ञानावभासकत्वादस्य प्राज्ञत्वं। अस्पष्टोपाधितयाऽनतिप्रकाशकत्वादस्यापीयमहं
कारादिकारणत्वात्कारणशरीरमित्युच्यते। आनंदप्रचुरत्वादानंदमयः कोशः। सुषुप्तिरप्यत एव
स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते। तदानीमेतावीश्वरप्राज्ञौ चैतन्यदीप्ताभिरतिसूक्ष्माभिर
ज्ञानवृत्तिभिरानंदमनुभवतः। आनंदमय आनंदभुक्चेतोमुखः प्राज्ञ इत्यादिश्रुतेः। सुखमहम
स्वाप्सं न किंचिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च। अनयोर्व्यष्टिसमष्ट्योर्वनवृक्षयोरिव ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ञाशयजलयोरिवाभेदः। एतदुपहितयोरपि ईश्वरप्राज्ञयोर्वनरक्षाकाशयोरिवजलाशयगतप्रतिबिंबा
काशयोरिवाभेदः। एषसर्वेश्वरइत्यादिश्रुतेः। वनरक्षतदवच्छिन्नाकाशयोर्जलाशयतद्गतप्रतिबिंबाकाश
योर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतंयदनुपहितंचैतन्यंतत्तुरीयमि
त्युच्यते। शिवंशांतमद्वैतंचतुर्थंमन्यंतेइत्यादिश्रुतेः। इदमेवशुद्धंचैतन्यंतुरीयमज्ञानादितदुपहितचैतन्या
भ्यांतप्तायःपिंडवदविविक्तंसन्महावाक्यस्यवाच्यं। विविक्तंसल्लक्ष्यमितिचोच्यते। अस्याज्ञानस्यावरण
विक्षेपनामकमस्तिशक्तिद्वयं। आवरणशक्तिस्तावद्यथाऽल्पोपिमेघोऽनेकयोजनमायतमादित्यमंडलम
वलोकयितुर्नयनपथंपिधायकतयाऽऽच्छादयतीवतथाऽज्ञानंपरिच्छिन्नमपि आत्मानमपरिच्छिन्नमसं
सारिणमवलोकयितुर्बुद्धिपिधायकतयाच्छादयतीवतादृशंसामर्थ्यं। तदुक्तं। घनच्छन्नदृष्टिर्घनच्छन्न
मर्कंयथामन्यतेनिःप्रभंचातिमूढः। तथाबद्धवद्भातियामूढदृष्टेः सनित्योपलब्धिस्वरूपोहमात्मेत्य
नयापमया। ऽत्मनःकर्तृत्वभोक्तृत्वसुखदुःखित्वादिसंसारभावनापिसंभवति। यथास्वाज्ञानेनाट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ तायांरज्जौ सर्पत्वसंभावना। विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावय
ति एवमज्ञानमपि स्वावृतात्मनि यथा विक्षेपशक्त्याकाशादिप्रपंचमुद्भावयति तादृशं सामर्थ्यं। तदुक्तं।
विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति। शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमि
त्तं। स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तंतुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीर
प्रधानतयोपादानं च भवति। तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशमाकाशाद्वायुर्वा
योरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते। एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः। तेषु जा
ड्याधिक्यदर्शनात्तमःप्रधानत्वं तत्कारणस्य। तदानीं सत्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वा
काशादिषूत्पद्यंते। एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चोच्यंते। एतेभ्यः सूक्ष्मशरी
राणि स्थूलभूतानि चोत्पद्यंते। सूक्ष्मशरीराणि सप्तदशावयवानि लिंगशरीराणि। अवयवास्तु। ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति। ज्ञानेंद्रियाणि। श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि।
एतानि पुनराकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते। बुद्धिर्नाम निश्चयात्मिकां
तःकरणवृत्तिः। मनो नाम संकल्पविकल्पात्मिकांतःकरणवृत्तिः। अनयोरेव चित्ताहंकारयोरंतर्भावः।
एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्यो उत्पद्यंते। एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्य
त्वं। इयं बुद्धिर्ज्ञानेंद्रियैः सती विज्ञानमयः कोशो भवति। अयं कर्तृत्वभोक्तृत्वाद्यभिमानत्वेनैव इहलो
कपरलोकगामी व्यवहारिको जीव इत्युच्यते। मनस्तु कर्मेंद्रियैः सहितं सत्मनोमयः कोशो भवति॥
कर्मेंद्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। एतानि पुनराकाशादीनां राजसांशेभ्यो व्यस्तेभ्यो मि
लितेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते। वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवा
न्नासाग्रवर्ती। अपानो नामाधोगमनवान्पाय्वादिस्थानवर्ती। व्यानो नाम वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ ऽग्गमनवानखिलशरीरवर्ती। उदानः कंठस्थानीयऊर्ध्वगमनवानुत्क्रमणवान्वायुः। समानः श
रीरमध्यस्थोऽशितपीतादिन्नो समीकरणकरः। केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्याः
पंचान्येवायवः संतीतिवदंति। नाग उद्गिरणकरः। कूर्म उन्मीलनकरः। कृकलः क्षुधाकरः। देवदत्तो
जृंभणाकरः। धनंजयः पोषणकरः। एतेषांप्राणादिष्वंतर्भावात्प्राणादयः पंचैवेतिकेचित्। एवंप्राणा
दिपंचकमाकाशादिगतरजोंशेभ्यो मिलितेभ्यउत्पद्यते। तत्राप्ययं क्रमः। आकाशाच्छ्रोत्रपादौ। वायो वाचौ
पादौ ४ स्त्वक्पाणी। तेजसश्चक्षुर्वाविंद्रिये। अप्सु जिह्वोपस्थे। पृथिव्याघ्राणपायू इंद्रिये। इदंप्राणादि
पंचकंकर्मेंद्रियैः सहितंसत्प्राणमयः कोशो भवति। तस्यक्रियात्मकत्वेनरजोंशकार्यत्वं। एतेषु
कोशेषुमध्ये विज्ञानमयो ज्ञानशक्तिमान्कर्तृरूपः। मनोमयः इच्छाशक्तिमान्करणरूपः। प्राण
मयः क्रियाशक्तिमान्कार्यरूपः। योग्यत्वादेवमेतेषांविभागइतिवर्णयंति। एतत्कोशत्रयंमिलितं ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्सूक्ष्मशरीरमित्युच्यते। अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतयावनवज्जलाशयद्वासम
ष्टिः। अनेकबुद्धिविषयतयावृक्षवज्जलद्वाव्यष्टिरितिसंभवति। एतत्समष्ट्युपहितंचैतन्यंसूत्रात्मा
हिरण्यगर्भः प्राणइतिचोच्यते। सर्वत्रानुस्यूतत्वाज्ज्ञानक्रियाशक्तिमदुपंचीकृतपंचमहाभूताभिमा
निवाच्चेति। विज्ञानमयादिकोशत्रयंजाग्रद्वासनामयत्वात्स्वप्नः। अतएवस्थूलशरीरलयस्था
नमितिचोच्यते। एतद्व्यष्ट्युपहितंचैतन्यंतैजसोभवति। तेजोमयांतःकरणोपहितत्वात्। अस्या
पीयंव्यष्टिःस्थूलशरीरापेक्षयासूक्ष्मत्वादेवहेतोः सूक्ष्मशरीरं। एतौसूत्रात्मतैजसौतदानीं
मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः। प्रविविक्तभुक्तैजसइत्यादिश्रुतेः। अत्रापिव्यष्टि
समष्ट्योस्तदुपहितसूत्रात्मतैजसयोश्चवनवृक्षवत्तदवच्छिन्नाकाशवज्जलाशयजलव
त्तद्गतप्रतिबिंबाकाशवदभेदः। एवंसूक्ष्मशरीरोत्पत्तिः। स्थूलभूतानितुपंचीकृतानि। पंची
करणंत्वाकाशादिषुपंचसुएकैकंद्विधासमंविभज्यतेषुदशसुभागेषुप्राथमिकान्पंचभागा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागांतरेषु संयोजना।
तदुक्तं। द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंचतेति। अस्याप्र
माण्यं नाशंकनीयं। त्रिवृत्करणमिति श्रुतेः पंचीकरणस्याप्युपलक्षणत्वात्पंचानां पंचात्मकत्वे स
मानेपि वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेनाकाशादिव्यपदेशः संभवति। तदानीमाकाशे शब्दो
भिव्यज्यते। वायौ शब्दस्पर्शौ। अग्नौ शब्दस्पर्शरूपाणि। अप्सु शब्दस्पर्शरूपरसाः। पृथिव्यां
शब्दस्पर्शरूपरसगंधाश्च। एतेभ्यः पंचीकृतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमेतन्नामकानामु
पर्युपरि विद्यमानानामतलवितलसुतलरसातलतलातलपातालमहातलनामकानामधोऽधो
विद्यमानानां लोकानां तदंतर्गतानां चतुर्विधस्थूलशरीराणामन्नपानादीनां चोत्पत्तिर्भवति। शरी
राणि जरायुजांडजस्वेदजोद्भिज्जाख्यानि। जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि। स्वेदजानि स्वेदाज्जातानि यूकामशकादीनि ॥
उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादीनि। अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिवि
षयतया वनवज्जलाशयवद्वा समष्टिः वृक्षवज्जलबिंदुवद्वा व्यष्टिरपि संभवति। एतत्समष्ट्युपहितं चै
तन्यं वैश्वानरो विराडिति चोच्यते। सर्वनराभिमानित्वाद्विविधराजमानत्वाच्च। अस्यैषा समष्टिः स्थू
लशरीरमन्नविकारत्वादन्नमयः कोशः स्थूलभोगायतनत्वाज्जाग्रच्चेति व्यवदिश्यते। एतद्व्यष्ट्युप
हितं चैतन्यं विश्व इत्युच्यते। सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात्। अ
स्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयः कोशः स्थूलभोगायतनत्वाज्जाग्र
दिति चोच्यते। तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादीन्द्रियपं
चकेन क्रमाच्छब्दस्पर्शरूपरसगंधानन्वनुभवतः। अग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७ तेन वागादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदांश्चानुभवतः। चंडचतुर्मुखशंकराच्युतैः
क्रमान्नियंत्रितेन मनोबुध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकार्यचै
त्तीश्च सर्वानेतान्स्थूलविषयाननुभवतः। जागरितस्थानो बहिःप्रज्ञ इत्यादि श्रुतेः। अत्राप्य
नयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षतदवच्छिन्नाकाशवच्च
जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पूर्ववदभेदः। एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्प
त्तिः। एतेषां स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति। यथावांतरवनानां
समष्टिरेकं महद्वनं। यथावांतरजलाशयानां समष्टिरेको महान्जलाशयः। एवमेतदुपहितविश्व
वैश्वानरादीश्वरपर्यंतं चैतन्यमप्यवांतरवनावच्छिन्नाकाशवदवांतरजलाशयतद्गतप्रतिबिंबा
काशवच्चैकमेव। आभ्यां महत्प्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदुपहितं चैतन्यं ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वं खल्विदं ब्रह्मेतिमहावाक्यस्यवाच्यं। विविक्तं सल्लक्ष्यमपिभवति। एवं वस्तुन्यवस्त्वारोपोध्यारो
पः सामान्येनप्रदर्शितः। इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीतिविशेषउच्यते। अतिप्रा
कृतस्त्वात्मा वैपुत्र इत्यादिश्रुतेः स्वस्मिन्निवस्वपुत्रेप्रेमदर्शनात् पुत्रेनष्टेपुष्टे चाहमेवनष्टः पुष्टश्चे
त्यनुभवाच्चपुत्र आत्मेतिवदति। चार्वाकास्तुस वाएषपुरुषोन्नरसमयइत्यादिश्रुतेः प्रदीप्तगृहा
त्स्वपुत्रंपरित्यज्यापिस्वस्यनिर्गमनदर्शनात्स्थूलोहं कृशोहमित्याद्यनुभवाच्चस्थूलशरीरमात्मेति
वदंति। अपरश्चार्वाकस्तु तेह प्राणाः प्रजापतिंपितरमेत्यब्रूयुरित्यादिश्रुतेरिंद्रियाणामभावेशरीरचल
नाद्यभावात्काणोहंबधिरोहमित्याद्यनुभवाच्चेंद्रियाण्यात्मेतिवदति। अपरश्चार्वाकोन्योंतर आ
त्माप्राणमयइत्यादिश्रुतेः प्राणाभावेइंद्रियादिचलनाभावादहमशनायावानहंपिपासावानित्या
द्यनुभवाच्च प्राणआत्मेतिवदति। अन्यस्तुचार्वाकोऽन्योंतर आत्मामनोमयइत्यादिश्रुतेर्मनसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुप्ते प्राणादेरनुसंधानाभावादहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति। बौद्धस्तु
अन्योंतर आत्मा विज्ञानमय इत्यादि श्रुतेर्बुध्यभावे करणस्य शक्त्यभावादहं कर्त्ताहं भोक्तेत्याद्यनुभवाच्च
बुद्धिरात्मेति वदति। प्राभाकरतार्किकाव न्योंतर आत्मा ऽऽनंदमय इति श्रुतेर्बुध्यादीनामज्ञाने लय
दर्शनादहमज्ञोहं ज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदंते। भाट्टास्तु प्रज्ञानघन एवानंदमय इत्या
दिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति
वदंति। अपरो बौद्धः ऽसदेव सोम्येदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्यु
त्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति। एतेषां पुत्रादीनां शून्यपर्यंताना
मनात्मत्वमुच्यते। एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियु
क्त्यनुभवाभासानां उत्तरोत्तरोक्तश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमनाऽकर्त्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादि
शून्यपर्यंतस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनात्मत्वादहं ब्रह्मेति विद्वदनुभवप्राब
ल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यंतमखिलमनात्मैव। अतस्तत्तद्भास
कं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदांतविद्वदनुभवः। एवमध्यारोपः।
अपवादो नाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमा
त्रत्वं। तथाहि। एतद्भोगायतनं चतुर्विधं शरीरजातं भोग्यरूपमन्नपानादिकमेतदाश्रयभूतं भूरादिचतुर्दशभु
वनान्येतदाश्रयभूतं ब्रह्मांडं चैतत्सर्वमेतेषां कारणभूतं पंचीकृतभूतमात्रं भवति। एतानि शब्दादिविष
यसहितानि पंचीकृतभूतजातानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणभूतापंचीकृतभूतमात्रं भव
ति। एतानि सत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैव चैतत्कारणभूताज्ञानोपहितचैतन्य
मात्रं भवति। एतदज्ञानमज्ञानोपहितचैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यं तुरीयं ब्रह्ममात्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०
आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति। तथाहि। अज्ञानादिसमष्टिरेतदुपहितं
तुर सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतन्यमेतत्त्रयं तप्तायःपिंडवदेकत्वेनावभासमानं तत्पदवाच्या
र्थः। एतदुपाध्युपहिताधारभूतानुपहितं चैतन्यं तुरीयं तत्पदस्य लक्ष्यार्थो भवति। अज्ञानादिव्यष्टिरे
तदुपहितात्पज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतन्यं चैतत्त्रयं तप्तायःपिंडवदेकत्वेनावभासमानं त्वं
पाध्यु पदवाच्यार्थो भवति। एतदुपहिताधारभूतमनुपहितप्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भव
ति। अथ महावाक्यार्थो वर्ण्यते॥ इदं तत्त्वमसिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति। संबंधत्रयं ना
म पदयोः सामानाधिकरण्यं। पदार्थयोर्विशेषणविशेष्यभावः। प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणसंबंधः॥
तदुक्तं। सामानाधिकरण्यं च विशेषणविशेष्यता। लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनो रिति। सा
मानाधिकरण्यसंबंधस्तावत्। एविभक्त्यंतमेकार्थनिष्ठत्वं सामानाधिकरण्यं। यथा सोयं देवदत्त इ
तिवाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिंडे तात्पर्यसंबंधः। तथा तत्त्वमसिवाक्य परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचै
तन्यवाचकत्वंपदस्य चैकस्मिन् चैतन्ये तात्पर्यसंबंधः। विशेषणविशेष्यभावस्तु यथा तत्रैव वाक्ये सशब्दार्थ
तत्कालविशिष्टदेवदत्तस्यायं शब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणवि
शेष्यभावः। तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैत
न्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसंबंधस्तु यथा तत्रैव सशब्दा
यं शब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभा
वः। तथात्रापि तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैत
न्येन सह लक्ष्यलक्षणभावः। इयमेव भागत्यागलक्षणेत्युच्यते। अस्मिन् वाक्ये नीलमुत्पलमि
ति वाक्यवद्वाक्यार्थो न संगच्छते। तत्र तु नीलपदार्थो नीलगुणस्योत्पलपदार्थो उत्पलद्रव्यस्य च शौकुय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० घटादिभेदव्यावर्त्तकतयाऽन्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्याभेद
स्य वाक्यार्थत्वांगीकारेण प्रमाणांतरविरोधाभावाद्वाक्यार्थः संगच्छते। अत्र तु तदर्थपरोक्षत्वादि
विशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणवि
शेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वाक्यार्थत्वांगीकारेण प्रत्यक्षादि
प्रमाणविरोधाद्वाक्यार्थो न संगच्छते। अत्र तु गंगायां घोषो वसतीतिवज्जहल्लक्षणा न संगच्छते। त
त्र गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषं परित्यज्य
तत्संबंधितीरे लक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते। अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्ष
णस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागांतरमपरित्यज्यान्यलक्षणाया युक्तत्वाज्जहल्लक्षणा
न संगच्छते। न च गंगापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं च स्वार्थ १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परित्यागेन त्वंपदार्थं तत्पदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न संगच्छते इति वाच्यं। तत्र तीरपदार्थो
श्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ
लक्षणया पुनरन्यपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावाच्च। अत्र शोणो धावतीतिवज्जहल्लक्षणा
पि न संभवति। तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तत्परित्यागेन तदाश्रयाश्वादि
लक्षणया तद्विरोधपरिहारासंभवात् जहल्लक्षणा संभवति। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्ट
चैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तत्परित्यागेन तत्संबंधिनो यस्य कस्यचिदर्थस्य लक्षितत्वे
पि तद्विरोधपरिहारासंभवात् जहल्लक्षणापि न संभवत्येव। न च त्वं पदं तत्पदं वा स्वार्थविरुद्धांश
परित्यागेनांशांतरसहितं तत्पदार्थं त्वंपदार्थं वा लक्षयत्वतः कथं प्रकारांतरेण भागलक्षणांगी
करणमिति वाच्यं। एकेन पदेन स्वार्थांशपदार्थांतरोभयलक्षणाया असंभवात्। पदांतरेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदर्थप्रतीतौ लक्षणायाः पुनस्तत्प्रतीत्यपेक्षाभावाच्च। तस्माद्यथा सोयं देवदत्त इत्यादिवाक्यं तत्
दर्थो वा तत्कालैतत्काल विशिष्टदेवदत्तैक्यलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्का
लैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं यथा लक्षयति तथा तत्त्वमसिवा
क्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्ध
मिति परोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखंडचैतन्यमात्रं लक्षयति। अ
थाधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवाद[illegible]पुरःस
रं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धसत्य
परमानंदानंताद्वयब्रह्मैवास्मीति अखंडाकाराकारिता चित्तवृत्तिरुदेति। सा तु चित्प्रतिबिंब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहितासतीप्रत्यगभिन्नमज्ञातं परब्रह्मविषयीकृत्य तद्गताज्ञानमेव बाधते। यथा पटकारणतं
तुदाहे पटदाहवदखिलकार्यकारणे ऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदंभू
तारवंडाकाराकारिताचित्तवृत्तिरपि बाधिता भवति। तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभादित्य
प्रभया ऽवभासमाना ऽसमर्था सती तया भिभूता भवति। तथा स्वयंप्रकाशमानप्रत्यगभिन्न
परब्रह्मावभासनानर्हतया तेनाभिभूतं सत्स्वोपाधिभूताखंडवृत्तेर्बाधितत्वाद्दर्पणाभावे मु
खप्रतिबिंबस्य मुखमात्रत्ववत्प्रत्यगभिन्नं परब्रह्ममात्रं भवति। एवं सति मनसैवानुद्रष्टव्यं।
यन्मनसा न मनुत इत्यनयोरविरोधः। वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्र
तिपादनात्। तदुक्तं। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्। ब्रह्मण्यज्ञाननाशाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२९ सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इत्यंते च प्रतिपादनम्॥२

इतिव्याप्तिरपेक्षितेति। स्वयंप्रकाशमानत्वान्नाभास उपयुज्यते इति च। जडपदार्थाकारा
कारितचित्तवृत्तेर्विशेषोस्ति। तथाहि। अयं घट इति घटाकाराकारिताचित्तवृत्तिरज्ञातं घटं
विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति। यथा
दीपप्रभामंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनिरसनपुरःसरं स्वप्रभया तद
पि भासतीयेति। एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यंतं श्रवणमनननिदिध्यासनसमाध्यनु
ष्ठानस्यापेक्षितत्वात्तेपि प्रदर्श्यंते। श्रवणं नाम षड्विधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि तात्
पर्यावधारणं। लिंगानि तु। उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्याख्यानि। प्रक
रणप्रतिपाद्यस्य तदाद्यंतयोरुपपादनमुपक्रमोपसंहारौ। यथा छांदोग्ये षष्ठप्रपाठके प्रकरणप्र
तिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमित्यंते च प्रतिपादनम्। प्रकरण

प्रतिपाद्यस्य तन्नामधेयपौनःपुन्येनप्रतिपादनमभ्यासः। यथातत्रैवाद्वितीयवस्तुनामधेयतत्त्वमसीति
नवकृत्वः प्रतिपादनं। प्रकरणप्रतिपाद्यस्यप्रमाणांतरेणाविषयीकरणमपूर्वत्वम्। यथातत्रैवा
द्वितीयवस्तुनोमानांतरेणाविषयीकरणमपूर्वत्वं। फलंतुप्रकरणप्रतिपाद्यात्मज्ञानस्यतदनुष्ठान
स्यवातत्रतत्रश्रूयमाणंप्रयोजनं। यथातत्रैवाचार्यवान्पुरुषोवेदतस्यतावदेवचिरंयावन्नविमो
क्ष्येऽथसंपत्स्यइत्यद्वितीयवस्तुज्ञानस्यतत्प्राप्तिःप्रयोजनंश्रूयते। प्रकरणप्रतिपाद्यस्यतत्रतत्रप्र
शंसनमर्थवादः। यथातत्रैवोततमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञातमित्य
द्वितीयवस्तुनःप्रशंसनं। प्रकरणप्रतिपाद्यार्थसाधनेतत्रतत्रश्रूयमाणायुक्तिरुपपत्तिः। यथातत्रैव।
यथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्याद्वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्य
मित्यादावद्वितीयवस्तुधेसोनेविकारस्यवाचारंभणमात्रत्वंयुक्तिःश्रूयते। मननंतु। श्रुतस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१२ द्वितीयवस्तुनो वेदांतानुगुणयुक्तिभिरनवरतमनुचिंतनं। विजातीयदेहादिप्रत्ययरहिताद्वि
तीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्। समाधिर्द्विविधः। सविकल्पो निर्विकल्पश्चे
ति। तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्पलयापेक्षया द्वितीयवस्तुनि तदाकाराका
रितायाश्चित्तवृत्तेरवस्थानं। तदा मृन्मयगजादिभानेपि मृद्भानवद्द्वैतभानेप्यद्वैतं वस्तु भा
सते। तदुक्तं भामतीये। दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं। अलेपकं स
र्वगतं यदद्वयं तदेव चाहं सततं विमुक्तः। शुद्धोहमानंदमविक्रियात्मको नानुमेस्ति कश्चिद्वि
षमस्वभावतः। पुरस्तिरश्चोर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वज आत्मनि स्थितः। निर्विकल्प
कस्तु। ज्ञातृज्ञानादिलयापेक्षया द्वितीयवस्तुनि तदाकाराकाराकारितायाश्चित्तवृत्ते
रितरामेकीभावेनावस्थानं। तदा जलाकाराकारितलवणानवभासेन जलमात्रावभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवद्दितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति। उभयत्रवृत्त्यभानेसमानेपितद्भानासद्भावमात्रेणतयोर्भेदोपप त्तेः। अस्यांगानि। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्राहिंसा सत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाः॥ करचरणादिसंस्थानविशेषलक्षणानिपद्मकस्वस्तिकादीन्यासनानि। रेचकपूरककुंभक लक्षणाःप्राणनिग्रहोपायाःप्राणायामाः। इंद्रियाणांस्वस्वविषयेभ्यःप्रत्याहरणंप्रत्याहा रः। अद्वितीयवस्तुन्यंतरिंद्रियवृत्तिधारणंधारणा। तत्राद्वितीयवस्तुनिविच्छिद्यवि च्छिद्यांतरिंद्रियवृत्तिप्रवाहोध्यानम्। समाधिस्तूक्तलक्षणःसविकल्पएव। अस्यांगिनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निर्विकल्पस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति। लयस्तावदखंडवस्त्वनवलं
बनेन चित्तवृत्तेर्निद्रा। अखंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः। लयविक्षेपाभावेपि चित्त
वृत्तेरागादिवासनया स्तब्धीभावादखंडवस्त्वनवलंबनं कषायः। अखंडवस्त्वनवलंबनेपि चित्तवृत्तेः सवि
कल्पकानंदास्वादनं रसास्वादः। समाध्यारंभसमये सविकल्पकानंदास्वादनं वा। अनेन विघ्नचतुष्टयेन
विरहितं चित्तं निर्वातस्थदीपवदचलं सदखंडचैतन्यमात्रं भवति यदा तदा निर्विकल्पसमाधिरित्युच्यते।
तदुक्तं। लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः। सकषायं विजानीयात्समप्राप्तं न चालयेत्। नास्वादये
द्रसं तत्र निःसंगः प्रज्ञया भवेदिति। यथा दीपो निवातस्थो नेंगते सोपमा स्मृतेति च। अथ जीवन्मुक्त
लक्षणमुच्यते। जीवन्मुक्तो नाम स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखंडब्रह्म
णि साक्षात्कृते अज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबंधरहितो ब्रह्म
निष्ठः। भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयंतु व्युत्थानसमयेमांसशोणितमूत्रपुरीषादिभाजनेनस्थूलशरीरेणांधत्वमौग्ध्यपंगुत्वादिभाजनेनेंद्रियग्रामेणा
शनायापिपासाशोकमोहादिभाजनेनांतःकरणेनचपूर्वपूर्ववासनयाक्रियमाणानिकर्माणिभुज्यमानानिज्ञानावि
रुद्धारब्धफलानिचपश्यन्नपिबाधितत्वात्परमार्थतोनपश्यति।यथारज्जुंभ्रममितिज्ञानबाधितदिंद्रजालंपश्य जाल
न्नपिपरमार्थमिदमितिनपश्यति।सचक्षुरचक्षुरिवसकर्णोऽकर्ण इत्यादिश्रुतेः।उक्तंच।सुषुप्तवज्जाग्रति
योनपश्यतिद्वयंतुपश्यन्नपिचाद्वयत्वतः।तथाकुर्वन्नपिनिष्क्रियश्चयःसआत्मविन्नान्यइतीहनिश्चयः।अ
स्यज्ञानात्पूर्वंविद्यमानानामेवाहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति।शुभाशुभयोरौ
दासीन्यंवा।तदुक्तं।बुद्धाद्वैतसतत्वस्ययथेष्टाचरणंयदि।शुनांतत्वदृशांचैवकोभेदोऽशुचिभक्षणइति।
ब्रह्मवित्वंतथामुक्त्वासआत्मज्ञोनचेतरइति।तदानीममानित्वादीनिज्ञानसाधनान्यद्वेष्टृत्वादयःसद्गु
णाश्चालंकारवदनुवर्त्तते।तदुक्तं।उत्पन्नात्मावबोधस्यह्यद्वेष्टृत्वादयोगुणाः।अयत्नतोभवंत्यस्यनतु
साधनरूपिणइति।किंबहुनायंदेहयात्रार्थमिच्छानिच्छापरेच्छाप्रापितानिसुखदुःखलक्षणान्यारब्धफलान्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५ नुभवतः करणाभासादीनामवभासकः सन्तदवसाने प्रत्यगानंदे परे ब्रह्मणि प्राणे लीने सत्यज्ञातत्कार्यसंस्का-
राणामपि विनाशात्परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासरहितमखंडब्रह्मावतिष्ठते। न तस्य
नी३ प्राणा उत्क्रामंत्यत्रैव समवलीयंते। विमुक्तश्च विमुच्यते इत्येवमादिश्रुतेः। छ। इति श्रीपरमहंस
परिव्राजकाचार्यसदानंदकृतौ वेदांतसारः॥ ॥ ॥ श्रीगंगाधरो जयति॥ छ॥ छ॥ छ छ॥ छ॥ ॥

तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः। तादात्म्यविषयज्ञानं तदिदं मुक्तिकारणम्॥१॥ सांख्य-
मते प्रधानं जगत्कारणम्। पातंजलमते प्रधानेश्वरौ कारणं। मीमांसाकारमते कर्मद्वारा जीवो ज-
गत्कारणम्। न्यायमते परमात्मा जगत्कारणम्। वैशेषिकमते तथा परमाणुर्जगत्कारणम्। वेदां-
तिनो मते ईश्वरो जगत्कारणम्। सांख्यपातंजलमीमांसान्यायवैशेषिका वेदांत एते आस्तिकाः। १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैभासिकसौत्रांतिकमाध्यमिकयोगाचार्यजैनचार्वाका एते नास्तिकाः। आरंभवादः कणपक्षभक्षः संघातवादस्तु भटस्य पक्षः। सांख्यादिषक्षः परिणामवादो वेदांतपक्षस्तु विवर्त्तवादः।।१।। न्यूनसत्ताकं तथाविधं कार्यं विवर्त्तः। यथा रज्जौ मिथ्याभूतानं भुजंग इति विवर्त्तवादः।। ॥ छ ॥ श्रीसांबसदाशिवो जयति॥ ॥ शाके १६८८ व्यय नामाब्दे प्रौष्ठपदसितदशम्यां शनौ याम्यायने सिंहस्थे गुरौ उत्तराषाढर्क्षे सौभाग्ययोगे लिखितं चेदं गौतमगोत्रज जगन्नाथभट्टात्मज शंकरेण वेदांतसार पुस्तकम्॥ ॥ छ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६

वेदांतसार पुस्तकावसानपत्रमिदं ज्ञेयम्। श्रीहरोजयति

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.01.20 14:13
,TRANSFERRED=2020/01/18 at 14:17:24
,PAGES=33
,TYPE=STD
,NAME=S0002568
,Book Name=M-2430-VEDANTSAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection